सदृशः फले। समुत्पन्नं हि लौहित्यं सर्वैर्देवगणै-र्हरिः। सर्वतीर्थोदकैः सम्यक् स्नापयामास तं सुतम्। तस्य स्नानसमुद्भूतः पापदर्पस्य पाटनः। तेनायं दर्पणो नाम पुरा देवगणैः कृतः। अस्मिन् स्नात्वा नदवरे योऽर्चेद् दर्पणाचले। कुबेरं प्रतिपत्तिथ्यां कार्त्तिके शुक्लपक्षतः। स याति ब्रह्मसदनमिह भूतिशतैर्युतः” इति कालि० पु० ८१ अ०। “दर्पणनिर्मलासु पतिते घनतिमिरमुषि” माघः।

“भूयो बभौ दर्पणमादधाना” कुमा०। “लोच-नाभ्यां विहीनस्य दर्पणः किं करिष्यति” चाण०। दर्पणस्य विम्बस्य स्वगतत्वव्यत्यस्तमुखत्वादिमोहजनक-त्वात् दर्पणत्वम्।

**दर्पद** त्रि० दर्पं ददाति दा—क। १गर्वदायकपदार्थे। २विष्णौ पु० “दर्पहा दर्पदः दृप्तः” विष्णुसह० “धर्मवर्त्मनि वर्त्तमानानां दर्पं ददाति दर्पदः” भा०।

**दर्पहन्** त्रि० दर्पं हन्ति हन—क्विप्। १गर्वहारके २विष्णौ पु०। दर्पदशब्दे दृश्यम्। [२१४२ पृ० उक्तम्।

**दर्भ** पु० दृभ—घञ् अच् वा। कुशभेदे तल्लक्षणादिकं कुशशब्दे

**दर्भट** न० दृभ—संदर्भे बा० अटन्। निभृतगृहे त्रिका०।

**दर्भपत्र** पु० दर्भस्येव पत्रमस्य। काशे राजनि०।

**दर्भपुष्प** पु० सर्पभेदे अहिशब्दे सुश्रुतवाक्यं दृश्यम्।

**दर्भमय** त्रि० दर्भात्मकः शरा० मयट्। कुशनिर्म्मिते ब्राह्मणादौ

**दर्भमूला** स्त्री दर्भस्येव मूलमस्याः पाककर्णेति ङीष्। ओषधीभेदे। [दूरदेशादौ।

**दर्भर** त्रि० दर्भस्य सन्निकृष्टदेशादि दर्भ+अश्मा० रः। दर्भा-

**दर्भानूप** पु० दर्भप्रचुरोऽनूपः संज्ञात्वेऽपि क्षुभ्नादिपाठात् पक्षे पूर्वपदात् न णत्वम्। दर्भप्रचुरेऽनूपे देशभेदे।

**दर्भाह्वय** पु० दर्भमाह्वयते स्पर्द्धयाऽऽत् आ+ह्वे—श। मुञ्ज तृणभेदे राजनि०। [भा० व० ८३ अ०।

**दर्भि** पु० ऋषिभेदे अर्द्धकीलाख्यं तीर्थं तेन निर्म्मितं यथाह “अर्द्धकीलञ्च तत्रैव तीर्थं कुरुकुलोद्वह”। “विप्रा-णामनुकम्पार्थं दर्भिणा निर्मितं पुरा। व्रतोपनयनाभ्या-ञ्चाप्युपवासेन चाप्युत। क्रियामन्त्रैश्च संयुक्तो ब्राह्मणः स्यान्न संशयः। क्रियामन्त्रविहीनोऽपि तत्र स्नात्वा नरर्षभ!। चीर्णव्रतो भवेद्विद्वान् दृष्टमेतत् पुरातनैः। समुद्राश्चापि चत्वारः समानीताश्च दर्भिणा। तेषु स्नात्वा नरश्रेष्ठ न दुर्गतिमवाप्नुयात्। फलानि गोसहस्राणां चतुर्णां विन्दते च सः।

**दर्म्म** त्रि० दृ—विदारे बा० म। दारके। “पुरां दर्म्मो अपा-मजः” ऋ० ४।४५।२। मनि दर्म्मन् तत्रार्थे “दर्म्मा दर्षीष्ट विश्वतः” ऋ०१।१३२।६।

**दर्य्य** त्रि० दरस्य हितम् गवा० यत्। दरहिते भयसाधने।

**दर्व** पुंस्त्री दृ—व। १राक्षसे उज्ज्वलद०। स्त्रियां ङीष्। २उशीनरपत्नीभेदे स्त्री “उशीनरस्य पत्न्यस्तु पञ्च राजर्षि-वंशजाः। मृगा कृमिर्नवा दर्वा पञ्चमी च दृषद्वती” “नवायास्तु नवः पुत्रो दर्व्यायाः सुव्रतोऽभवत्” हरिवं० ३१ अ०। ३हिंस्रे त्रि०। घञ्। ४हिंसायां पु०

**दर्वट** पु० दर्वाय हिंसायै अटति अट—अच् शक०। दण्डवा-दिनि हारा०। [ ३वाद्यभेदे संक्षिप्तसा०।

**दर्वरीक** पु० दृ—विदारे फर्फरीकादि० नि०। १इन्द्रे २वाते

**दर्वि(र्वी)** स्त्री दृ—विन् वा ङीप्। व्यञ्जनदारके (हाता) ख्याते पदार्थे खजाकायाम्।

“इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत्। वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम्। एषैव दर्वी यस्तत्र विशेषस्तमहं ब्रुवे। दर्वी द्व्यङ्गुलपृथ्वग्रा तुरीयोनन्तु मेक्षणम्” कात्या० स०। “मासर्तुदर्वीपरिघट्टनेन” भा० व० यक्षप्रश्ने। २अहिफणायां शब्दरत्ना० दर्वीकरः। [ तत्रार्थे द्विरूपकोषः।

**दर्विका** स्त्री स्वार्थे क। दर्व्यां रायमुकुटः। दर्वक पु०

**दर्वि(र्वी)होम** पु० ६त०। दर्वीसाधने होमभेदे “दर्वीहोमानु-पादाय सर्वान् यः प्राप्नुते क्रतून्” भा० स० १२ अ०।

**दर्वीकर** पु० दर्वी फणा कर इवास्य। सर्पे अहिशब्दे दृश्यम्।

**दर्वीसंक्रमण** न० तीर्थभेदे। “दर्वीसंक्रमणं प्राप्य तीर्थं त्रैलोक्यपूजितम्। अश्वमेधमवाप्नोति स्वर्गलोकञ्च गच्छति” भा० व० ८४ अ०।

**दर्श** पु० दृश्येते शास्त्रदृष्ट्या सूर्य्यचन्द्रौ एकत्र स्थितौ यत्र। दृश—आधारे घञ्। १सूर्य्येन्दुसङ्गमकाले अमावास्या-तिथौ “एकत्रस्थौ चन्द्रसूर्य्यौ दर्शनात् दर्श उच्यते” मत्स्यपु० कुहूशब्देऽस्य विवृतिः। स निमित्ततया-ऽस्त्यस्य अच्। २दर्शकालकर्त्तव्ये यागभेदे। आग्नेया-ष्टाकपालैन्द्रदध्यैन्द्रपयोरूपयागत्रयात्मको दर्शयागः। काती-यशब्दे तद्दिनकर्त्तव्यता दृश्या। “सर्वेभ्यो दर्शपौर्ण-मासौ” श्रुतिः भावे घञ्। दर्शने ३चाक्षुषज्ञाने।

**दर्शक** त्रि० पश्यति दृश—ण्वुल् दर्शयति दृश—णिच् ण्वुल् वा। १द्रष्टरि २प्रधाने ३निपुणे मेदि०। ४द्वारपाले पु० अमरः स हि द्वारदेशे समागतान् निवेद्य राजानं